# **CBSE Class 12 संस्कृत कोर**
## **एनसीईआरटी प्रश्न-उत्तर**
## **पाठ - 5 अहो! राजते कीदृशीयं हिमानी**

---

**अनुप्रयोगः**

**1. समासविग्रहानां शब्दान् संयोजयित्वा समासशब्दान् लिखत -**

1. **पर्वते आरोहणम्** ........................
2. **विशालः कायः यस्याः सा** ........................
3. **यात्रायाः वृत्तम्** ........................
4. **उतुङ्गाः ये पर्वताः ते** ........................
5. **नीलः वर्णः यस्याः सा** ........................
6. **महान् च असौ कविः** ........................

**उत्तरम्-**

1. पर्वते आरोहणम् पर्वतारोहणम्
2. विशालः कायः यस्याः सा विशालकाया
3. यात्रायाः वृत्तम् यात्रावृत्तम्
4. उतुङ्गाः ये पर्वताः ते उत्तुङ्ग पर्वताः
5. नीलः वर्णः यस्याः सा नीलवर्णा
6. महान् च असौ कविः महाकविः ।

---

**2. कोष्ठके शब्देषु उचितविभक्तिं वाक्यपूर्तिं कुरुत-**

1. **........................ (अस्मद्) कक्षायाः सर्वे छात्राः द्रष्टुमुत्सुकाः सन्ति।**
2. **पुरातत्त्वसम्बन्धीनि (चित्र) ........................ पर्यटकानाम् आकर्षणकेन्द्रम्।**
3. **ग्रीष्मपर्वाणि ( भगवत्) ........................ बुद्धं प्रति भक्तिभावं दर्शयन्ति।**
4. **घनीभूतं हिमं (गिरिराज) ........................ शोभां सततं प्रवर्धयति।**
5. **गुणसन्निपाते एकः (दोष) ........................ निमज्जति।**

**उत्तरम्-**

1. मम/ अस्माकम् कक्षायाः सर्वे छात्राः द्रष्टुमुत्सुकाः सन्ति।

2. पुरातत्त्वसम्बन्धीनि <u>चित्राणि</u> पर्यटकानाम् आकर्षणकेन्द्रम्।
3. ग्रीष्मपर्वाणि <u>भगवन्तं</u> बुद्धं प्रति भक्तिभावं दर्शयन्ति।
4. घनीभूतं हिमं <u>गिरिराजस्य</u> शोभां सततं प्रवर्धयति।
5. गुणसन्निपाते एकः <u>दोषो:</u> निमज्जति।

---

**3. सर्वनाम/कर्त्ता शब्दानाम् आधारे उचितधातुरूपै: रिक्तस्थानानि पूरयत-**

1. **इदम् अभियानं रोचकं साहसिकं च (अस्-लङ्) ........................।**
2. **लद्दाखप्रदेशीयाः गिरयः अतीव (शोभ्-लट्.) ........................।**
3. **भवती लद्दाखप्रदेशस्य प्राकृतिकस्थलानां विषये किमपि (ब्रू-लोट्) ........................।**
4. **वार्षिकोत्सवः शीते ऋतौ (आ + या-लृट्) ........................।**
5. **ग्रीष्मे समागते हिमराशिः द्रवीभूय कृषकाणां भूमिसेचने भूयिष्ठं (उप + कृ-लट्)।**

**उत्तरम्-**
**विशेष - क्रियापूर्ति समये विशेषरूपेण कर्त्ता /सर्वनाम् शब्दस्य वचनम् ध्यातव्य**

1. इदम् अभियानं रोचकं साहसिकं च <u>आसीत्</u> ।
2. लद्दाखप्रदेशीयाः गिरयः अतीव <u>शोभन्ते</u> ।
3. भवती लद्दाखप्रदेशस्य प्राकृतिकस्थलानां विषये किमपि <u>ब्रवीतु</u> ।
4. वार्षिकोत्सवः शीते ऋतौ <u>आयास्यति</u>।
5. ग्रीष्मे समागते हिमराशिः द्रवीभूय कृषकाणां भूमिसेचने भूयिष्ठं उपकरोति।

---

**4. अधोलिखितेषु वाक्येषु वाच्यपरिवर्तनं कुरुत-**

| | | |
|---|---|---|
| (क) | ईदृशीं दुर्गमां यात्रां विद्यालयस्य छात्राः सम्पादितवन्तः। | ........................<br>........................ |
| (ख) | अस्माभि: प्रक्षेपकमाध्यमेन यात्रावृत्तं दृश्यते। | ........................<br>........................ |
| (ग) | उत्तुंगपर्वतानाम् उपत्यकाभूमिं लद्दाख इति कथयन्ति। | ........................<br>........................ |
| (घ) | मठानां भव्यता प्रेक्षकान् प्रसभम् आकर्षति। | ........................<br>........................ |
| (ङ) | कारगिले आक्रमणकारिणाम् | ........................ |

| | | |
|---|---|---|
| | अपसारणाय भारतीयैः वीरैः शौर्यं प्रदर्शितम्। | ........................ ........................ |

**उत्तरम्-**

(क) ईदृशी दुर्गमा यात्रा विद्यालयस्य छात्रैः सम्पादिता।

(ख) वयं प्रक्षेपकमाध्यमेन यात्रावृत्तं पश्यामः।

(ग) उत्तुंगपर्वतानाम् उपत्यकाभूमिः 'लद्दाख' इति कथ्यते।

(घ) मठानां भव्यतया प्रेक्षकाः प्रसभम् आकृष्यन्ते।

(ङ) कारगिले आक्रमणकारिणाम् अपसारणाय भारतीयाः वीराः शौर्यं प्रदर्शितवन्तः।

**5. अत्र व्दे खण्डे विशेषणविशेष्य पदानि सन्ति। एतयो: उचितम् मेलनम् कुरु-**

| 'अ' स्तम्भः | 'ब' स्तम्भः |
|---|---|
| (i) दृढ़: | (क) पर्वतारोहणम् |
| (ii) विघ्नबहुलम् | (ख) हिमम् |
| (iii) रोचकम् | (ग) हिमराशिः |
| (iv) धवलः | (घ) यात्रावृत्तम् |
| (v) नीलवर्णा | (ङ) पर्यटनस्थलम् |
| (vi) प्रसिद्धम् | (च) मूर्तिः |
| (vii) विशालकाया | (छ) भूमिः |
| (viii) सौभाग्यविलोपि | (ज) सङ्कल्पः |

**उत्तरम्-**

| 'अ' स्तम्भः | 'ब' स्तम्भः |
|---|---|
| (i) दृढ़: | (ज) सङ्कल्पः |
| (ii) विघ्नबहुलम् | (ङ) पर्वतारोहणम् |
| (iii) रोचकम् | (घ) यात्रावृत्तम् |
| (iv) धवलः | (ग) हिमराशिः |
| (v) नीलवर्णा | (छ) भूमिः |

| | |
|---|---|
| (vi) प्रसिद्धम् | (क) पर्यटनस्थलम् |
| (vii) विशालकाया | (च) मूर्तिः |
| (viii) सौभाग्यविलोपि | (ख) हिमम् |

**6.** **निर्देशानुसारम् उत्तरत-**

1. **'नीलवर्णा भूमिः' अनयोः पदयोः किं विशेषणपदम्?**
2. **'विस्तृतः' अस्य स्थाने किं पदं संवादे प्रयुक्तम्?**
3. **'प्रवेशः' इति अस्य विलोमपदं किम्?**
4. **'आवृणोति' इति पदे उपसर्गः कः, कः च धातुः?**
5. **'नीलाकाशः छत्रवत् प्रतीयते।' अत्र क्रियापदं चिनुत।**
6. **'तिब्बतक्षेत्रे बौद्धधर्मस्य प्रवेशः अभवत्' अत्र कर्तृपदं चिनुत।**

**उत्तरम्-** (1) नीलवर्णा, (2) आस्तृतः, (3) निष्क्रमः/प्रस्थानम्, (4) आ उपसर्गः, वृ धातुः, (5) प्रतीयते, (6) प्रवेशः।

7. संस्कृत भाषायाम् एकपदेन उत्तरत-

1. **केन मार्गेण छात्रैः पर्वतारोहणं कृतं स्यात्?**
2. **विद्या वित्तं च कथं प्राप्यते?**
3. **शिक्षिकया यात्रावृत्तं केन प्रदर्शितम्?**
4. **स्टाकपैलेससंग्रहालये कति कक्षाः सन्ति?**
5. **बौद्धानां वार्षिकोत्सवः कस्मिन् ऋतौ आयाति?**

**उत्तरम्-** (1) लेहलद्दाखमार्गेण (2) उद्यमेन/दृढ़संकल्पेन (3) प्रक्षेपकेण (4) सप्तसप्ततिः (5) शीते।

**8.** **पाथस्य आधारे पूर्णवाक्येन उचितम् उत्तरं लिखत -**

1. **पर्वतारोहणस्य अभियानं कीदृशम् आसीत्?**
2. **लद्दाखशब्दस्य कः विशिष्टः अर्थः?**
3. **कः स्तूपः रात्रौ दीपेषु प्रज्वलितेषु, भव्यम् आलोकम् वितरति?**
4. **लेहनगरे प्रख्याताः बौद्धमठाः के सन्ति?**
5. **एकः दोषः कुत्र निमज्जति?**

**उत्तरम्-**

1. पर्वतारोहणस्य अभियानम् अतीव रोचकं साहसिकं चासीत्।
2. "उतुङ्गपर्वतानाम् उपत्यकाभूमिः" इति लद्दाख शब्दस्य विशिष्टः अर्थः।
3. 'लेहे' इति बौद्धधर्मस्य प्रसिद्धः प्राचीनश्च श्वेतस्तूपः रात्रौ दीपेषु प्रज्वलितेषु भव्यम् आलोकम् वितरति।
4. लेहनगरे प्रख्याताः बौद्धमठाः 'शे, थिक्शे, हेमिस, स्ताक्ना, माठो नामानः सन्ति।
5. एकः दोषः गुणसन्निपाते निमज्जति।

---

**9. रेखांङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

1. <u>भारतीयसैनिकानां</u> कष्टसहिष्णुता त्यागभावना च श्लाघीनीये स्तः।
2. अस्मिन् भित्तिचित्रे <u>पर्वतारोहणस्य</u> दृश्यम् अस्ति।
3. छात्राः <u>प्रक्षेपकमाध्यमेन</u> यात्रावृत्तम् अपश्यन्।
4. 'लेह' इति <u>बौद्धधर्मस्य</u> प्राचीनः श्वेतस्तूपः।
5. 'गम्पा' नाम वार्षिकोत्सवः <u>शीतेऋतौ</u> आयाति।
6. 'कारगिले' भारतीयैः वीरैः <u>शौर्यं</u> प्रदर्शितम्।

**उत्तरम्-**
**विशेष - प्रश्ननिर्माणे किम् शब्दस्य रूपम्/ प्रश्नवाचकशब्दं विशेषरूपेण प्रयोगम् करणीय:**

1. <u>केषां</u> कष्टसहिष्णुता त्यागभावना च श्लाघीनीये स्तः?
2. अस्मिन् भित्तिचित्रे <u>कस्य</u> दृश्यम् अस्ति?
3. छात्राः <u>केन</u> यात्रावृत्तम् अपश्यन्?
4. 'लेह' इति <u>कस्य</u> प्राचीनः श्वेतस्तूपः?
5. 'गम्पा' नाम वार्षिकोत्सव <u>कदा</u> आयाति?
6. ‘कारगिले' भारतीयैः वीरैः <u>किं</u> प्रदर्शितम्?